
ISSN: 2456-9186, Vol. II, Issue. I, June-2018

वागर्थः

(An International Journal of Sanskrit Research)

Journal Homepage: http://cphfs.in/research.php



# धातुपाठस्योपलब्धतानुपलब्धताविमर्शः

डॉ.गोविन्द नाथ चौधरी

ग्राम+पत्रालय- सहसराम,

थाना- बिरौल, जिला- दरभङ्गा, (बिहार)- 847203

Email: govindnathchaudhary@gmail.com

**पूर्व-पीठिका :** *संस्कृतव्याकरणवाङ्मये पाणिनेराचार्यस्य शब्दानुशासनं हि मात्रमेकमार्षतन्त्रमस्ति यत्स्वकीयैः पञ्चावयवैः सह समुपलभ्यते । अतः व्याकरणमिदं पञ्चाङ्गमित्युच्यते । तानि पञ्चाङ्गानि सन्ति- (1).सूत्रपाठः, (2).गणपाठः, (3).धातुपाठः, (4).लिङ्गानुशासनम्, (5).उणादिसुत्रपाठश्चेति । तत्र केचिदुणादिसूत्रपाठस्थाने परिभाषापाठं समावेशयन्ति । अत एव वैयाकरणानां कृते पाणिनीयं शब्दानुशासनं सर्वोपरि विद्यते । पाणिनिर्हि स्वशब्दानुशासनस्य पूर्णतायै सूत्रपाठेन सह येषामङ्गानां प्रवचनं कृतवान् तेषु धातुपाठः प्रमुखः। पाणिनीयव्याकरणे यस्य धातुपाठस्येदानीमध्ययनाध्यापनं प्रचलितं तत्पाणिनिप्रोक्तमिति मन्यते ।*

*वस्तुतस्तु संस्कृतवाङ्मयस्य ये खलु शास्त्रपदालङ्कृताः मूलभूताः ग्रन्थाः समुपलभ्यन्ते, ते किल प्रोक्ता एव, न तु कृता इति । अतोऽष्टाध्यायीवद् धातुपाठोऽपि पाणिनिप्रोक्त एव, न तु कृतः। अतो हि कथ्यते- "पाणिनिना प्रोक्तं पाणिनीयं शब्दानुशासनमि"ति, न तु पाणिनिना कृतमिति । प्रोक्तेषु च ग्रन्थेषु बहुत्र पूर्वग्रन्थानां वर्णानुपूर्वी भवति कश्चिदंशश्च ग्रन्थकारस्यापि ।*

*महर्षिः पाणिनिर्धातुपाठस्य येन प्रकारेण प्रवचनं कृतवान्, स धातुपाठः सम्प्रति नोपलभ्यते । अष्टाध्याय्या उपलब्धेषु वृत्तिग्रन्थेषु प्राचीनतमायां काशिकावृत्तावपि धातुपाठो नोपलभ्यते । तत्र प्राक्तनधातुपाठः कथन्नोपलभ्यते इति चिन्तनीयं वर्तते ।*

## I. धातुपाठानां वैविध्यम्

पाणिनीयव्याकरणस्योपलब्धेषु धातुपाठग्रन्थेषु बहुवैविध्यं दृश्यते । तत्र वैविध्यं हि- धात्वर्थनिर्देशदृष्ट्या, वृद्धलघुपाठदृष्ट्या प्राच्यादिभेददृष्ट्या चेति । एतेषां विवरणमेवं विद्यते-

### I.I धात्वर्थनिर्देशदृष्ट्या

पाणिनिना हि धातुपाठस्यार्थनिर्देशसहितोऽर्थनिर्देशरहितश्चेति द्विविधो धातुपाठः प्रोक्तः। तत्र केषाञ्चिच्छिष्याणां कृतेऽर्थनिर्देशसहिताः "भू सत्तायाम्, एध वृद्धौ' इत्येतत्सदृशाः धातवः प्रतिपादिताः। अपरेषाञ्च कृतेऽर्थनिर्देशं विनैव "भ्वेधस्पर्ध...." इत्यादयो धातवः संहितापाठेनेति । पाणिनेरुभयविधपाठयोः संहितापाठो ह्युत्तमः। यथा महाभाष्यकारादिभिरष्टाध्याय्यां सूत्राणां संहितापाठस्यैव प्रामाण्यं स्वीक्रियते । अत एव "तपऐश्वर्येवावृतुवरणे, पतगतौवापशानुपसर्गाद्" इत्यादिषु धातुवृत्तिकाराः विवदन्ते । व्याख्यानभेदोऽयं संहितापाठमाश्रित्यैव सम्भवति, नान्यथा । यश्च संहितापाठं प्रमाणीकृत्य विविधः सूत्रविच्छेदः प्रदर्शितस्तत्रतत्राचार्यैः स पाणिनीय एवेति वैयाकरणानां परम्परा विद्यते । इयमेवोररीकृत्य "तपऐश्वर्ये वावृतुवरणे" इत्यत्राचार्यसायणेनोक्तम्-[1] "अस्माकं तूभयमपि प्रमाणम्, आचार्येणोभयथा शिष्याणां प्रतिपादनादि"ति । तत्र धातुपाठं प्रवचता भगवता पाणिनिना केचन शिष्याः "तप ऐश्वर्ये वा, वृतु वरणे" इत्येवं विच्छिद्य केचन च "तप ऐश्वर्ये, वावृतु वरणे" इत्येवं विच्छिद्य प्रतिपादिता इति ।

पुराकाले खलु धातुपाठः विशिष्टस्वरयुक्तः आसीत्, परञ्चेदानीं न दृश्यते । यथा धातुपाठाद् अनुनासिकचिह्नं नष्टं जातं तथैव धातुभ्य उदात्तानुदात्तनिर्देशविषयकं चिह्नमपि नष्टं जातम् । तत्रेड्विधानाय येषां धातूनामुदात्तत्वमिष्टं ते उदात्तास्तथा चेडागम यत्रेष्टो नासीत् तेऽनुदात्ताः पठिता आसन्निति । अतो हि प्रतीयते यत्तस्यैव निर्देशः-[2] "एकाच उपदेशेऽनुदात्तात्" इति सूत्रे पाणिनिना कृतः। एवमेवेत्संज्ञाविशिष्टोऽचः कुत्रचिदुदात्तः, कुत्रचिदनुदात्तः कुत्रचिच्च स्वरितश्चेति । एतस्यैव निर्देशः केषाञ्चित्सूत्रेषु दृश्यते । तद्यथा-[3]

"अनुदात्त ङित आत्मनेपदम्", "स्वरितञितः कर्त्रभिप्राये क्रियाफले"[4] इति। एतत्सन्दर्भे धातुपाठस्य व्याख्याकारैरप्युक्तम्। तद्यथा-[5] "अत एव चुरादिभूतान् स्वरान्वितान् नाकरोत्" इति । अपि च-[6] "कार्याभावादेकश्रुत्या पठ्यन्ते" इति। एभिरुद्धरणैः परिपुष्टं भवति यच्चुरादिगणं विहायान्ये धातवः कस्मिंश्चित्समये विशिष्टस्वरयुक्तो भूत्वा पठिता आसन्निति।

### I.II वृद्धलघुपाठदृष्ट्या

अर्थनिर्देशरहितोऽयं संहितापाठो धातुपाठः वैयाकरणनिकाये प्रसिद्धो वर्तते स किल 'लघुपाठः', सार्थनिर्देशश्च धातुपाठो वृद्धपाठोऽस्तीति । प्रतीयते यत्सार्थवृद्धधातुपाठस्याध्ययनाध्यापने व्यवह्रियमाणत्वाल्लघुपाठो नष्टो जातः। एवमेव सार्थनिर्देशो वृद्धपाठस्तु अध्ययनाध्यापने बहुलप्रचारित्वादिदानीं सर्वत्रोपलभ्यते।

### I.III प्राच्यादिभेददृष्ट्या

सार्थनिर्देशवृद्धधातुपाठोऽयं देशभेदेन प्राच्यौदीच्यदाक्षिणात्येति त्रिविधः पाठः सञ्जातः। यथा-

(क). **प्राच्यपाठः-** प्राग्देशीय मैत्रेयप्रभृतयो व्याख्यातारो विद्वांसो धातुपाठस्य यं पाठं स्वीकुर्वन्ति स प्राच्यपाठ इति कथ्यते।

(ख). **उदीच्यपाठः-** क्षीरस्वाम्यादयो महाशयाः यं पाठमाश्रयन्ति, स पश्चिमोत्तरदेशेषु प्रमाणत्वेन स्वीकृतः पाठ उदीच्यपाठ इति कथ्यते।

(ग). **दाक्षिणात्यपाठः-** आचार्यपाल्यकीर्त्तेरुपजीव्यभूतः पाणिनीयधातुपाठश्च दाक्षिणात्यसम्मतो धातुपाठ इत्यनुमीयते, न त्विदानीं सः साक्षादुपलभ्यते।

## II. धातुपाठस्य सम्प्रति समुपलब्धाः ग्रन्थाः

यद्यपि पाणिनेर्मूलधातुपाठः सम्प्रति नोपलभ्यते तत्र ये केचन ग्रन्थाः सम्प्रति समुपलभ्यन्ते, ते वृत्तिसहिताः परिष्कृताश्च सन्ति। तत एव सम्पादकाः धातुपाठसूचीं निर्माय तत्तद्ग्रन्थेषु परिशिष्टरूपेण प्रदर्शयन्ति । वृत्तिसहितपरिष्कृतधातुपाठग्रन्थेषु केषाञ्चिदेव कृतय उपलभ्यन्ते। तत्र क्षीरतरङ्गिणी, धातुप्रदीपः, माधवीयाधातुवृत्तिः, प्रक्रियासर्वस्वम्, सिद्धान्तकौमुद्याः भ्वादिप्रकरणानीत्यादीनि चातिप्रसिद्धानि सन्ति । तत्रापि च क्षीरतरङ्गिणी, माधवीयाधातुवृत्तिः, सिद्धान्तकौमुद्याः भ्वादिप्रकरणानि चातिप्रसिद्धानि सन्ति । एतेषु क्षीरस्वामिनः क्षीरतरङ्गिणीतिनामको धातुपाठग्रन्थः सर्वातिप्राचीनो विद्यते । ग्रन्थोऽयं पाणिनीय-धातुपाठस्यौदीच्यपाठमनुसृत्य विरचितो जातः। व्याख्यातमिदमुपलभ्यमानेषु प्राचीनतमं महत्त्वपूर्णञ्च ग्रन्थरत्नमिति। भ्वादितश्चुरादिपर्यन्तमत्र दशगणास्सन्ति । यत्र हि सामान्यतः लट्लिट्लुङ्लकारेषु धातूनां रूपाणि प्रस्तुतानि दृश्यन्ते, विशेषश्चेदन्येष्वपि। अतएव क्वचित्तदुक्तखण्डनाय क्वचित्परमतदूषणे दार्ढ्याय स्वमतदूषणनिरासाय वेति मैत्रेयसायणभट्टोजिदीक्षितादयोऽप्यर्वाचीना धातुवृत्तिकारा आचार्याश्च क्षीरस्वामिमतं पदे-पदे समुद्धरन्ति।

वैयाकरणेषु धातुपाठस्याध्ययनाध्यापने सम्प्रति व्यवह्रियमाणो यः पाठो वर्तते, स नार्षपाठः पुरातनः, अपितु विविधग्रन्थेभ्यः सायणाचार्यपरिष्कृतोऽस्ति । प्राचीनेष्ववर्वाचीनेषु च नानाविधेषु धातुव्याख्यानेषु माधवीयाधातुवृत्तिरियं सर्वोपकारिका सुगमतमा चेति निर्विवादा वर्तते । धातुवृत्तितः प्राचीने द्वे वृत्ती- क्षीरतरङ्गिणीधातुप्रदीपश्च समुपलभ्येते, परं ते सङ्क्षिप्ते स्तः। तयोरपि धातुप्रदीप इति वृत्तिः सङ्क्षिप्ततरेति । नैताभ्यां विद्वांसोऽपि धातुकान्तारावगाहनं कर्तुं शक्ताः, किं पुनरकृतधियः, नैव च तयोः प्रतिधातुणिजन्त-सन्नन्तादिरूपाणि प्रदर्श्यन्ते । धातुवृत्तिर्हि क्षीरतरङ्गिणीतो विस्तृता । धातोर्विशिष्टरूपाण्यत्र सूत्रनिर्देशपुरस्सरं साधितानि सन्ति । नामधातुप्रक्रियास्याः वैशिष्ट्येष्वन्यतमेति। प्रायेणेह समेषां धातूनां णिजन्तादिप्रक्रियाः सङ्क्षेपतः प्रदर्शितास्सन्ति। सन्दिग्धेषु रूपेषु विविधमतान्युद्धृत्य निर्णयोऽप्यत्र प्रस्तुतो दृश्यते। यद्यप्यनेकत्र परमसूक्ष्मविचारचर्चया काठिन्यमपि समपद्यत तथापि कृतधियां विपश्चितां विदुषां कृते परमसाहाय्यमियमातनुते । सिद्धान्तकौमुद्याः प्रचारतः पूर्वं धातुपाठस्य कीदृशी अध्ययनाध्यापनस्य प्रवृत्तिरासीदित्यस्य वास्तविकं स्वरूपमत्रैवोपलभ्यते । धात्वर्थनिर्देशश्चात्र सटिप्पणः स्वानुकूलश्चास्ति । किं बहुना, आर्षपाठविधिना अध्यापकानामध्येष्यमाणानाञ्च काशिकावृत्तिरिवेयमपि प्रधानसहायकभूता वर्तते। एवं हि वृत्तिकारैर्व्याख्यातृभिश्च शतशः पुनरुक्तः सायणाचार्यपरिष्कृतः पाणिनीयधातुपाठः सर्वानपि धातुपाठानतिशय्य तिष्ठते।

एवमेव सायणाचार्यस्यानन्तरं भट्टोजिदीक्षितमहाशयेन सिद्धान्तकौमुद्या उत्तरार्धे तृतीये भागे पाणिनीयधातुपाठस्य प्रक्रियाक्रमेणसर्वेऽपि धातवः समुपस्थापिताः दृश्यन्ते । वैक्रमद्वादशशतकात् पाणिनीयव्याकरणस्याध्ययनेऽध्यापने च सूत्रक्रमेण सह प्रक्रियाक्रमेणापि अध्ययनमध्यापनञ्च प्रारब्धम्। तत्र सूत्रक्रमानुसारिग्रन्थेषु भाषावृत्तिः, वैयाकरणसिद्धान्तकौमुदी, वैयाकरणसिद्धान्तसुधानिधिश्चातीव प्रसिद्धाः सन्ति। प्रक्रियाग्रन्थेषु रूपावतारः, रूपमाला, प्रक्रियाकौमुदी, वैयाकरणसिद्धान्तकौमुदी च संस्कृतवाङ्मये सर्वातिशयेन प्रसिद्धिमलभन्त । प्रक्रियाग्रन्थः प्रकरणात्मको भवति । ग्रन्थैकदेशः प्रकरणं कथ्यते । अतः पाणिनीयव्याकरणस्य य एकदेशः धातुपाठः तमाश्रित्यापि भ्वादीनि प्रकरणानि वैयाकरणसिद्धान्तकौमुद्यां समावेशितानि दृश्यन्ते। येषु प्रक्रियाग्रन्थेषु प्रसङ्गतो धातुपाठस्य व्याख्यानं जातं, तेषु समेषां धातूनां व्याख्यानं न दृश्यते । परञ्च भट्टोजिविरचितायां सिद्धान्तकौमुद्यां, नारायणभट्टविरचिते प्रक्रियासर्वस्वे चेत्यभिधयोर्ग्रन्थयोः समेषां धातूनां रूपाणि प्रदर्शितानि दृश्यन्ते। तत्रापि सिद्धान्तकौमुद्यां हि प्रक्रियाक्रमेण लेट्लकारं विहाय सर्वेषु च लकारेषु व्याख्यानं दृश्यते। लेट्लकारस्य च रूपं वेदे एव दृश्यते, न तु लौकिके । तद्यथा चोक्तम्-[7] "एषु पञ्चमो लकारश्छन्दोमात्रगोचरः" इति । तत्र दशलकाराणां गणनाक्रमे लेट्लकारः पञ्चमो वर्तते । प्रक्रियाक्रमेणाध्ययना-ध्यापनव्यवस्थामिदानीं कौमुद्याः महती उपयोगिता दृश्यते। तत्रापि

विद्वांसोऽत्रत्यान् धातून् पाणिनीय-धातुपाठान् स्वीकृत्य पाणिनीयव्याकरणस्य पञ्चाङ्गतां साधयन्ति । एवमेवाख्यातचन्द्रिकादिग्रन्थानां स्थानमायाति।

पाणिनीये हि धातुपाठे प्रायः द्विसहस्रमिताः धातवः सन्ति । ये च भ्वादि-अदादि-जुहोत्यादि-दिवादि-स्वादि-रुधादि-तुदादि-तनादि-क्र्यादि-चुरादिषु दशषु गणेषु विभक्ताः सन्ति । तत्रापि स्वप्रकृत्यनुसारेण परस्मैपदिन-आत्मनेपदिन-उभयपदिनश्चेति । तत्रापि च सार्वधातुकार्धधातुकभेदाद्विविधः। एक एवापि धातुरर्थवशात्पदान्तरं भजते । यथा सत्तार्थे परस्मैपदी प्राप्त्यर्थे चात्मनेपदी भवतीति ।

सम्प्रति पाणिनीयव्याकरणे धातूनां पठनपाठनस्य या व्यवस्था वरीवर्ति सा हि पाणिनीयधातुपाठानुसारेणैव प्रतीयते । भ्वादितश्चुरादिपर्यन्तं दशगणीयानां धातूनां धातुपाठपूर्वकं प्र यानुसारेण, ततः सिध्यमानानां तिङन्तपदानां प्रदर्शनं विहितम् । अद्यत्वे हि सायणाचार्यपरिष्कृतः माधवीयाधातुवृत्तौ पठितो धातुपाठः भट्टोजिदीक्षितपरिष्कृतो धातुपाठश्च पाणिनीयधातुपाठरूपेण विदुषां मध्ये सर्वमान्यो विद्येते ।

### III. धातुपाठानामव्यवस्था

एवमेवोपलब्धेषु धातुपाठेषु पाठानां महती अव्यवस्थाऽपि दृश्यते । तत्र केषाञ्चिद्धातूनां क्रमविपर्यासः, केषाञ्चिदर्थविपर्ययः, केषाञ्चिदभावः केषाञ्चिच्च पुनराधिक्यमपि दृश्यते । धातुपाठस्य कयोरपि द्वयोर्व्याख्यानयोः साम्यं नोपलभ्यते । एषा व्यवस्था हि चिरकालादेव प्रसृता, उत्तरोत्तरञ्च वृद्धिङ्गता प्राप्तेति प्रतीयते । तद्यथा-[8] "जक्षित्यादयः षट्.... न वार्थः परिगणनेन अगणान्तमभ्यस्तसंज्ञा । इहापि तर्हि प्राप्नोति- 'आङः शासु....." इति ।

एतेन भाष्यवचनेन प्रतीयते यत्पतञ्जलेः समये-[9] "आङः शासु इच्छायाम्" इत्यस्य धातोः "वेवीङ् वेतिना तुल्ये[10]" इत्यस्यानन्तरं क्वचित्पाठ नासीदिति । परञ्च कैयटस्य समये 'आङः शासु' इत्यस्य धातोः 'वेवीङ्' इत्यस्यानन्तरं नासीदिति तदीयव्याख्यानतो ज्ञायते । तद्यथा-[11] "ननु जक्षित्यादयः पूर्वमेव आस उपवेशने इत्यनन्तरमाङः शासु इति पठ्यते । तत्कथं तस्याभ्यस्तसंज्ञा स्यात् । अत आह- वेवीङोऽनन्तर (कैश्चित् पठ्यते) इति" ।

ननु "जक्षित्यादयः षट्[12]" इति सूत्रे षडिति पदस्य नावस्थिततत्वे सति अदादिगणपर्यन्तं याभ्यस्तसंज्ञा प्राप्यते तन्निमित्तकदोषपरिहाराय महाभाष्ये कथितम्-[13] "षसिवशी छान्दसौ" इति । तत्रैव कैयटेनाप्युक्तम्-[14] "षस शस्ति स्वप्ने इति ये न पठन्ति, केवलं षस स्वप्ने, वश कान्तौ इति तन्मतेनैतदुक्तम्" इति । एतेन प्रतीयते यत्कैयटसमये द्विविधः पाठ आसीदिति । द्विविधोऽयं पाठोऽद्यापि समुपलभ्यते । तद्यथा-[15] "षस स्वप्ने, वश कान्तौ" इति । अपि च-[16] "षस शस्ति स्वप्ने, वश कान्तौ" इति । एवं हि धातुपाठस्याव्यवस्थाविषये माधवीयाधातुवृत्तौ बहुत्र निर्देशः प्रस्तुतो विद्यते । तद्यथा-

1) "इह केचिद् 'धृञ् धारणे' इति पठन्ति सोऽनार्षः। अस्माभिस्तु मैत्रेयाद्यनुरोधेन ञित्प्रकरणे हरदत्तेरनन्तरं पठित्वाऽयमुदाहृतः[17]" इति ।
2) "गाङ्गतौ..... गापोष्टगित्यत्र न्यासपदमञ्जर्योः 'अयं धातुरादादिकः' इति स्थितम् । शपि पाठे चास्य प्रयोजनं नास्ति । अस्माभिस्तु 'क्वापि पठितव्यः' इति मैत्रेयाद्यनुसारेण पठितः[18]" इति ।
3) "षच् समवाये..... एवञ्च न्यासकारादीनां बहूनामभिमतत्वादयं धातुरस्माभिः पठितः[19]" इति ।
4) "एते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते[20]" इति ।
5) "तत्राद्यौ बृहिश्च मैत्रेयाद्यनुरोधेनास्माभिर्दण्डके पठितः[21]" इति ।

एवमेव पाठार्थनिर्देशपरम्परायाः भ्रष्टत्वे सति क्षीरस्वामिनाप्युक्तम् । तद्यथा-[22]

"पाठेऽर्थे चागमभ्रंशान्महतामपि मोहतः । न विद्मः किन्नु जहीमः किं वात्रादध्महे वयम् ।।" इति ।

सम्प्रत्युपलब्धेषु धातुपाठेषु ईड् धातोः पाठः केवलं स्तुत्यर्थे एव दृश्यते । यथा-[23] "ईड् स्तुतौ" इति । परञ्चास्य धातोः पाठः पूर्वं खलु चोदनायां याच्ञायां प्रेरणेऽर्थे चापि प्रयोगो भवतिस्म । तद्यथा-[24] "ईडि स्तुतिचोदनायाच्ञासु दृष्टः प्रेरणे चापि वर्तते, अग्निर्वा इतो वृष्टिमीड्डे मरुतो मुतश्च्यावयन्ति" इति ।

अतो ह्येभिः प्रमाणैर्विस्पष्टं भवति यत्पाणिनीयधातुपाठे चिरकालादेव पाठविपर्यासारम्भोऽभूदिति ।

### निष्कर्षः

इत्थं हि पाणिनीयधातुपाठस्य मूलत्वेनानुपलम्भाद् धातूनां वास्तविकस्वरूपनिर्णये तेषामर्थनिर्णये च महान्तो विद्वांसोऽपि काठिन्यमनुभवन्ति। वैयाकरणसिद्धान्तकौमुद्यामपि भट्टोजिदीक्षितमहाशयः आह-[25] "स्फुर, स्फुल सञ्चलने। स्फुर स्फुरणे। स्फुल सञ्चलने इत्येके।.......स्फर इत्यकारोपधं केचित्पठन्ति । पस्फार" इत्येवमुक्त्वा विरमति । धातुपाठानामव्यवस्थाकारणादेव कतिपये एतेऽपि धातवः सन्ति ये महाभाष्ये पठिता उपलभ्यन्ते । परन्तु तेषां पाठः कस्मिंश्चिदपि धातुपाठे नोपलभ्यते । यथा- क्षद, रश, लुश इत्येते धातवः सन्ति । तद्यथा-

(क). क्षद-[26] "क्षदेश्च युक्ते । क्षदेश्च युक्ते तृन्वक्तव्यः" इति ।

(ख). रश-[27] "रशिरस्मायविशेषेणोपदिष्टः स राशिः, रश्मिः रशनेत्येवं विषयः" इति ।

(ग). लुश-[28] "लुशिरस्मायविशेषेणोपदिष्टः स लोष्टः इत्येवं विषयः" इति ।

तथ्यमिदं "महाभाष्ये निर्दिष्टानां धातूनां विवेचनात्मकमध्ययनमि"ति विषये शोधकार्यं सम्पादयता मया समुपलब्धं, यस्योल्लेखः शोधप्रबन्धे सविस्तरं कृतं विद्यते । मदीय

विचारानुसारेण विदुषामेका सङ्गोष्ठी भवेद् यत्र असन्दिग्धधातुपाठः निर्णीतो भूत्वा सर्वमान्यो भवेदिति शम् ।

**सन्दर्भसूची**


1. माधवीयाधातुवृत्तिः,पृष्ठ- 418 ।
2. अष्टाध्यायी- 7-2-10 ।
3. अष्टाध्यायी- 1-3-12 ।
4. अष्टाध्यायी- 1-3-72 ।
5. क्षीरतरङ्गिणी- 10-131 ।
6. माधवीयाधातुवृत्तिः,पृष्ठ- 370 ।
7. वैयाकरणसिद्धान्तकौमुदी- भ्वादेरादौ ।
8. महाभाष्यम्- 6-1-1 (जक्षित्यादयः षडिति सूत्रे) ।
9. वैयाकरणसिद्धान्तकौमुदी (अदादि), धातुसङ्ख्या-1022 ।
10. क्षीरतरङ्गिणी- 2-78 ।
11. महाभाष्यम् (प्रदीपः)- 6-1-1 (जक्षित्यादयः षडिति सूत्रे) ।
12. अष्टाध्यायी- 6-1-6 ।
13. महाभाष्यम्- 6-1-1 (जक्षित्यादयः षडिति सूत्रे) ।
14. महाभाष्यम् (प्रदीपः)- 6-1-1 (जक्षित्यादयः षडिति सूत्रे) ।
15. क्षीरतरङ्गिणी- 2/81-82 ।
16. धातुप्रदीपः- 2-65 ।
17. माधवीयाधातुवृत्तिः,पृष्ठ- 266 ।
18. माधवीयाधातुवृत्तिः,पृष्ठ- 267 ।
19. माधवीयाधातुवृत्तिः,पृष्ठ- 292 ।
20. माधवीयाधातुवृत्तिः,पृष्ठ- 562 ।
21. माधवीयाधातुवृत्तिः,पृष्ठ- 562 ।
22. क्षीरतरङ्गिणी- चुरादेरादौ ।
23. वैयाकरणसिद्धान्तकौमुदी (अदादि), धातुसङ्ख्या-1019 ।
24. महाभाष्यम्- 1-3-1 ।
25. वैयाकरणसिद्धान्तकौमुदी (तुदादि), धातुसङ्ख्या-1389-1390 ।
26. महाभाष्यम्- 3-2-3 (तृन् इति सूत्रे) ।
27. महाभाष्यम्- 7-1-2 (स्त्रियाश्चेति सूत्रे) ।
28. महाभाष्यम्- 7-1-2 (स्त्रियाश्चेति सूत्रे) ।